Roll No. | | | | | | | | |

(Write Roll Number from left side exactly as in the Admit Card)

Signature of Invigilator

Question Booklet Series **X**

PAPER–II **Question Booklet No.**
(Identical with OMR Answer Sheet Number)

Subject Code : 03

SANSKRIT

Time : 2 Hours *Maximum Marks: 200*

Instructions for the Candidates

1. Write your Roll Number in the space provided on the top of this page as well as on the OMR Sheet provided.
2. At the commencement of the examination, the question booklet will be given to you. In the first 5 minutes, you are requested to open the booklet and verify it:
   - (i) To have access to the Question Booklet, tear off the paper seal on the edge of this cover page.
   - (ii) Faulty booklet, if detected, should be got replaced immediately by a correct booklet from the invigilator within the period of 5 minutes. Afterwards, neither the Question Booklet will be replaced nor any extra time will be given.
   - (iii) Verify whether the Question Booklet No. is identical with OMR Answer Sheet No.; if not, the full set is to be replaced.
   - (iv) After this verification is over, the Question Booklet Series and Question Booklet Number should be entered on the OMR Sheet.
3. This paper consists of One hundred (100) multiple-choice type questions. All the questions are compulsory. Each question carries *two* marks.
4. Each Question has four alternative responses marked: (A) (B) (C) (D) . You have to darken the circle as indicated below on the correct response against each question.

   Example: (A) (B) ● (D) , where (C) is the correct response.
5. Your responses to the questions are to be indicated correctly in the OMR Sheet. If you mark your response at any place other than in the circle in the OMR Sheet, it will not be evaluated.
6. Rough work is to be done at the end of this booklet.
7. If you write your Name, Roll Number, Phone Number or put any mark on any part of the OMR Sheet, except in the space allotted for the relevant entries, which may disclose your identity, or use abusive language or employ any other unfair means, such as change of response by scratching or using white fluid, you will render yourself liable to disqualification.
8. Do not tamper or fold the OMR Sheet in any way. If you do so, your OMR Sheet will not be evaluated.
9. You have to return the Original OMR Sheet to the invigilator at the end of the examination compulsorily and must not carry it with you outside the Examination Hall. You are, however, allowed to carry question booklet and duplicate copy of OMR Sheet after completion of examination.
10. **Use only Black Ball point pen.**
11. **Use of any calculator, mobile phone, electronic devices/gadgets etc. is strictly prohibited.**
12. **There is no negative marks for incorrect answer.**

SANSKRIT

Paper II

1. 'शतक्रतु:' इति विशेषणेन क: विशिष्यते?

(A) सोम:

(B) वरूण:

(C) इन्द्र:

(D) रूद्र:

2. उषस: भ्राता क:?

(A) सूर्य:

(B) भग:

(C) अग्नि:

(D) इन्द्र:

3. मरुत्सखा कस्य विशेषणमस्ति?

(A) सोमस्य

(B) इन्द्रस्य

(C) वरुणस्य

(D) विष्णो:

4. 'दमुना:' कस्य विशेषणमस्ति?

(A) रुद्रस्य

(B) अग्ने:

(C) सोमस्य

(D) वरुणस्य

5. अग्निविद्याविषयक: उपनिषद्ग्रन्थ:

(A) कठोपनिषद्

(B) छान्दग्योपनिषद्

(C) ईशावास्योपनिषद्

(D) श्वेताश्वतरोपनिषद्

6. कस्य वेदस्यारण्यकं नास्ति?

(A) ऋग्वेदस्य

(B) यजुर्वेदस्य

(C) सामवेदस्य

(D) अथर्ववेदस्य

7. 'उत्तिष्ठत जाग्रत प्राप्य वरान् निबोधत' इति मन्त्र: दृश्यते

(A) ईशावास्योपनिषदि

(B) मुण्डकोपनिषदि

(C) कठोपनिषदि

(D) श्वेताश्वतरोपनिषदि

8. वैदिककालनिर्णये ज्योतिष्शास्त्रस्योपयोग: कृत:

(A) मैक्समूलरेण

(B) तिलकेन

(C) विन्टर्नित्सेन

(D) दयानन्देन

9. राष्ट्राभिवर्धनसूक्तमस्ति

(A) ऋग्वेदे

(B) यजुर्वेदे

(C) सामवेदे

(D) अथर्ववेदे

10. पुराणी युवति: का?

(A) अदिति:

(B) वाक्

(C) उषा:

(D) पृथिवी

11. वाधूलश्रौतसूत्रस्य अन्तर्भावो भवति
(A) ऋग्वेदे
(B) सामवेदे
(C) कृष्णयजुर्वेदे
(D) शुक्लयजुर्वेदे

12. 'मोद' इति वेदशाखा भवति
(A) ऋग्वेदस्य
(B) सामवेदस्य
(C) यजुर्वेदस्य
(D) अथर्ववेदस्य

13. दर्शपूर्णमासयागे प्रयाजानां संख्या भवति
(A) पञ्च
(B) षट्
(C) नव
(D) दश

14. शुक्लयजुर्वेदीयशतपथब्राह्मणस्य काण्वशाखायाम् अध्याया वर्तन्ते
(A) 100
(B) 102
(C) 103
(D) 104

15. 'न वै स्त्रैणानि सख्यानि सन्ति' इति ऋक् वर्तते ऋक्संहितायाः
(A) इन्द्रसुक्ते (2·12)
(B) पुरुरवउर्वशीसंवादे
(C) पुरुषसूक्ते (10·90)
(D) विश्वामित्र–नदी संवादे (3·33)

16. गोपथब्राह्मणस्य अध्यायसंख्या वर्तन्ते
(A) पञ्च
(B) षट्
(C) दश
(D) एकादश

17. वेदपाठे एतेषु कः प्रकृतिपाठः?
(A) क्रमपाठः
(B) मालापाठः
(C) जटापाठः
(D) शिखापाठः

18. अथर्ववेदीयं धर्मसूत्रं भवति
(A) बौधायनस्य
(B) गौतमस्य
(C) हारीतस्य
(D) न कस्यापि

19. 'चरैवेति' इति महावाक्यं विद्यते
(A) ऐतरेयब्राह्मणे
(B) आर्षेयब्राह्मणे
(C) शतपथब्राह्मणे
(D) गोपथब्राह्मणे

20. पुष्पसूत्रमिति प्रातिशाख्यं विद्यते
(A) ऋग्वेदस्य
(B) सामवेदस्य
(C) शुक्लयजुर्वेदस्य
(D) कृष्णयजुर्वेदस्य

21. तर्कभाषानुसारं प्रमेया: सन्ति
(A) दश
(B) एकादश
(C) द्वादश
(D) त्रयोदश

22. सन्दिग्धसाध्यवान्
(A) पक्ष:
(B) विपक्ष:
(C) सपक्ष:
(D) परामर्श:

23. व्याप्यत्वेन ज्ञायमानं लिङ्गमनुमितिकरणम् इति मतम्
(A) प्राचीननैयायिकानाम्
(B) नवीननैयायिकानाम्
(C) चार्वाकाणाम्
(D) बौद्धदार्शनिकानाम्

24. सपक्षे विपक्षे च वर्त्तमान: हेत्वाभास:
(A) साधारण:
(B) असाधारण:
(C) अनुपसंहारी
(D) बाधित:

25. व्याप्यस्य पक्षवृत्तित्वधी:
(A) व्याप्ति:
(B) पक्षता
(C) परामर्श:
(D) अनुमिति:

26. न्यायमते पदार्थयो: सम्बन्धनियामक: क:?
(A) योग्यता
(B) आसत्ति:
(C) आकांक्षा
(D) मुख्यार्थ:

27. पारिमाण्डल्यं नाम किम्?
(A) द्व्यणुकम्
(B) त्रसरेणु
(C) अणुपरिमाणम्
(D) ब्रह्माण्डम्

28. घट: स्वगतरूपादे:
(A) असमवायिकारणम्
(B) समवायिकारणम्
(C) निमित्तकारणम्
(D) न कारणम्

29. सांसिद्धिकं नैमित्तिकञ्च द्वौ भेदौ स्त:।
(A) गुरुत्वस्य
(B) द्रवत्वस्य
(C) रसस्य
(D) स्नेहस्य

30. एकस्मिन् धर्मिणि विरुद्ध-नानार्थ-विमर्श: भवति
(A) तर्क:
(B) विपर्यय:
(C) संशय:
(D) आकाङ्क्षा

31. भौमदिव्यौदर्याकरजभेदात् विषयश्चतुर्विध:।

(A) पृथिव्या:

(B) अपाम्

(C) तेजस:

(D) वायो:

32. सदैव तेषु तेषु विषयेषु क्षिप्यमाणमत्यन्तमस्थिरम्

(A) मूढम्

(B) विक्षिप्तम्

(C) क्षिप्तम्

(D) एकाग्रम्

33. 'शब्दज्ञानानुपाती वस्तुशून्य:'

(A) निद्रा

(B) स्मृति:

(C) विपर्यय:

(D) विकल्प:

34. शरीरपरिमाण आत्मा चेतन: इति कस्मिन् दर्शने स्वीकृतम् अस्ति?

(A) बौद्धदर्शने

(B) जैनदर्शने

(C) सांख्यदर्शने

(D) न्यायदर्शने

35. अधोलिखितेष्वेक: बौद्धसिद्धान्त: नास्ति। स हि

(A) प्रतीत्यसमुत्पादवाद:

(B) क्षणिकत्ववाद:

(C) सत्कार्यवाद:

(D) अनात्मवाद:

36. वेदान्तसारग्रन्थस्य प्रस्तुतविषय: न भवति

(A) साधनचतुष्टयम्

(B) मुमुक्षुत्वम्

(C) क्षणिकत्ववाद:

(D) अज्ञानस्वरूपम्

37. विष्वग् गमनवान् अखिलशरीरवर्त्ती वायु:

(A) प्राण:

(B) अपान:

(C) समान:

(D) व्यान:

38. अखिलसम्बन्धरहितो ब्रह्मनिष्ठ: क:?

(A) प्राज्ञ:

(B) जीवन्मुक्त:

(C) ईश्वर:

(D) मुमुक्षु:

39. त्रैगुण्यविपर्ययात् इति कस्य हेतु:?

(A) पुरुषबहुत्ववादस्य

(B) सत्कार्यवादस्य

(C) प्रत्ययसर्गवादस्य

(D) सेश्वरसांख्यवादस्य

40. प्रमेयसिद्धि: कस्मात् भवति?

(A) विज्ञानात्

(B) पुरुषात्

(C) अज्ञानात्

(D) प्रमाणात्

41. ‘*et món’ इति इन्दो-युरोपीयशब्दस्य संस्कृतरूपं भवति

(A) आत्मन्

(B) एतमा

(C) उतम

(D) सामन्

42. Teutonic इति कस्या भाषा-शाखाया नामान्तरम्?

(A) Celtic

(B) Germanic

(C) Italic

(D) Greek

43. त्रिषष्टिः चतुःषष्टिर्वा वर्णाः शम्भोर्मते मताः कुत्र उपलभ्यते?

(A) नारदीयशिक्षायाम्

(B) याज्ञवल्क्यशिक्षायाम्

(C) पाणिनीयशिक्षायाम्

(D) वार्हस्पत्यशिक्षायाम्

44. लोकिकभाषया सह वैदिकभाषायाः मुख्यं पार्थक्यं विद्यते

(A) अर्थबोधे

(B) शाब्दबोधे

(C) स्वर-विषये (Accent)

(D) पदार्थज्ञाने

45. ''अथेत्ययं शब्दोऽधिकारार्थःप्रयुज्यते''– अत्र ''अधिकारार्थः'' इत्यस्य कोऽर्थः?

(A) अधिकारस्य अर्थः

(B) अधिकारः अर्थः (शक्यार्थः) यस्य

(C) अधिकारः अर्थः (प्रयोजनं) यस्य

(D) अधिकाराय

46. ''स्थूलपृषती'' इत्यस्य कोऽर्थः?

(A) स्थूला चासौ पृषती च

(B) स्थूला च पृषती च

(C) स्थूला पृषती

(D) स्थूलानि पृषन्ति यस्याः सा

47. ''प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ता''– अत्र ‘प्रत्याङ्भ्याम्’ इत्यत्र केन सूत्रेण का विभक्तिः?

(A) हेतौ इति तृतीया

(B) विभाषागुणेऽस्त्रियाम् इति पञ्चमी

(C) सहयुक्तेऽप्रधाने इति तृतीया

(D) अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते इति पञ्चमी

48. ''पादेन खञ्जः देवदत्तः'' इन्यत्र पादेनेति तृतीया ‘येनाङ्गविकारः’ इति सूत्रेण भवति। सूत्रस्थेन अङ्गशब्देन प्रस्तुतोदाहरणे कः बोध्यः?

(A) पादः

(B) देवदत्तः

(C) पादः देवदत्तश्च उभौ

(D) एतयोः कोऽपि न

49. ''ऊकालोऽज्झ्रस्वदीर्घप्लुतः'' इत्यत्र ऊस्थले

(A) बहुव्रीहिसमासः

(B) तत्पुरुषसमासः

(C) द्वन्द्वसमासः

(D) कोऽपि समासः नास्ति

50. अधःस्थेषु तिङन्तेषु किं पदं न साधु?

(A) जिज्ञासते

(B) पिपासते

(C) दिदृक्षते

(D) विवक्षति

51. ''जपन् सिद्धिमवाप्नोति'' इत्यत्र शतृप्रयोग: कस्मिन्नर्थे?
(A) लक्षणार्थे
(B) हेत्वर्थे
(C) शीलार्थे
(D) सामर्थ्यार्थे

52. मुकुन्देन प्रासाद: दृष्ट:।
मुकुन्देन प्रासाद: अध्यासित:।
मुकुन्द: प्रासादं दृष्ट:।
मुकुन्द: प्रासादम् अध्यासित:।
– इमानि चत्वारि वाक्यानि आश्रित्य
अध:स्थितेषु क: विचार: युक्तियुक्त:?
(A) केवलं तृतीयवाक्यम् अशुद्धम्
(B) केवलं चतुर्थवाक्यम् अशुद्धम्
(C) केवलं तृतीयं चतुर्थं चेति वाक्यद्वयम् अशुद्धम्
(D) सर्वाणि वाक्यानि शुद्धानि

53. वाक्यलक्षणप्रसङ्गे 'एकोऽनवयव: शब्द: वाक्यम्' इति मतम्
(A) पतञ्जले:
(B) पाणिने:
(C) भर्तृहरे:
(D) कात्यायनस्य

54. 'रामेण बाणेन हतो बाली' इत्यत्र तृतीया केन सूत्रेण विधीयते?
(A) कर्तृकरणे कृता बहुलम्
(B) तृतीया तत्कृतार्थेन गुणवचनेन
(C) कर्तृकर्मणो: कृति
(D) कर्तृकरणयोस्तृतीया

55. 'दाधा घ्वदाप्' इत्यत्र 'अदाप्' इत्यस्य विग्रहवाक्यं किम्?
(A) अश्च दाप् च
(B) न दाप्
(C) अद् च आप् च
(D) अश्च दा च आप् च

56. 'यवनानी' इत्यस्य आशय:
(A) यवनानां लिपि:
(B) यवनस्य पत्नी
(C) यवनानां भाषा
(D) दुष्ट: यव:

57. एषु आधार–कर्मण: उदाहरणं नास्ति
(A) अधिशेते समुद्रं हरि:
(B) अभिनिविशते सन्मार्गम्
(C) उपहरिं सुरा:
(D) अधितिष्ठति वैकुण्ठं हरि:

58. 'वागर्थाविव' इत्यत्र विभक्तिलोपाभाव: विधीयते केन सूत्रेण?
(A) सुपो धातुप्रातिपदिकयो:
(B) इवेन समासो विभक्त्यलोपश्च
(C) नलोप: प्रातिपदिकान्तस्य
(D) प्रत्ययलोपे प्रत्ययलक्षणम्

59. 'बुभुक्षा' इत्यत्र क: प्रत्यय:?
(A) णिच्
(B) सन्
(C) यङ्
(D) क्यङ्

60. 'ओदन: भुक्त:' इत्यत्र 'ओदन:' इति प्रथमा भवति केन सूत्रेण?
(A) उक्ते कर्तरि प्रथमा
(B) उक्ते कर्मणि प्रथमा
(C) प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा
(D) कर्तरि प्रथमा

61. दुष्यन्तेनाहितं तेजो दधानां भूतये भुवः।
अवेहि तनयां ब्रह्मन्नग्निगर्भां शमीमिव।।– इयमुक्तिः
(A) शार्ङ्गरवस्य
(B) शारद्वतस्य
(C) प्रियंवदायाः
(D) विदूषकस्य

62. उपेन्द्रवज्रायां गणसंस्थानं तावत्
(A) ततजगगाः
(B) तभजगगाः
(C) जतजगगाः
(D) मततगगाः

63. ''एते राजकुमारा गच्छन्ति''– अत्र विश्वनाथमतेन
(A) उपादानलक्षणा सारोपा गौणी
(B) उपादानलक्षणा साध्यवसाना गौणी
(C) लक्षणलक्षणा सारोपा गौणी
(D) लक्षणलक्षणा साध्यवसाना गौणी

64. हर्षचरितपञ्चमोच्छ्वासे हर्षवर्धनाय तस्य पितुः दाहज्वरसंवादं को न्यवेदयत्?
(A) कुरङ्गकः
(B) संवादकः
(C) हंसवेगः
(D) दीर्घजङ्घः

65. ''प्रथमे हि विद्वांसो वैयाकरणा व्याकरणमूलत्वात् सर्वविद्यानाम्''– इयमुक्तिः कुत्र वर्तते?
(A) महाभाष्ये
(B) ध्वन्यालोके
(C) वक्रोक्तिजीविते
(D) काशिकायाम्

66. "On The Sublime" इति ग्रन्थस्य प्रणेता अयमिति उच्यते
(A) Aristotle
(B) Plato
(C) Croche
(D) Longinus

67. विश्रुतचरितम् केन रचनाकारेण सम्बद्धम्?
(A) शूद्रकेण
(B) बाणभट्टेन
(C) दण्डिना
(D) हर्षेण

68. एषु कः अनुप्रास-भेदः नास्ति?
(A) छेकानुप्रासः
(B) वृत्त्यनुप्रासः
(C) लाटानुप्रासः
(D) वाक्यानुप्रासः

69. 'व्यक्तिविवेकः' कस्य कृतिः?
(A) धनञ्जयस्य
(B) कुन्तकस्य
(C) महिमभट्टस्य
(D) आनन्दवर्धनस्य

70. मृच्छकटिके 'व्यवहार'– नामकः अङ्कविशेषः कः?
(A) दशमः
(B) नवमः
(C) पञ्चमः
(D) सप्तमः

71. 'कान्तासम्मिततयोपदेश:' काव्यस्य किमुच्यते?

(A) लक्षणम्

(B) प्रयोजनम्

(C) विषय:

(D) ज्ञानम्

72. स्वप्नवासवदत्ते नाटके अवन्तिका-वेशधारिणी का अस्ति?

(A) रत्नावली

(B) पद्मावती

(C) सागरिका

(D) वासवदत्ता

73. साहित्यदर्पणे रसात्मकम् इति पदस्य विग्रह: अस्ति

(A) रसे एव आत्मा यस्य

(B) आत्मवत्

(C) रस: एव आत्मा यस्य

(D) रस: आत्मनि यस्य

74. ''क्व सूर्यप्रभवो वंश: क्व चाल्पविषया मति:।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्।।''–

अस्मिन् श्लोके विश्वनाथेन कोऽलंकार उक्त:?

(A) निदर्शना

(B) दृष्टान्त:

(C) प्रतिवस्तूपमा

(D) उत्प्रेक्षा

75. रवीन्द्रनाथप्रणीतस्य वाल्मीकिप्रतिभानाटकस्य संस्कृतानुवाद: कृतोऽनेन

(A) अम्बिकादत्तव्यासेन

(B) श्रीधरभास्करवर्णेकरेण

(C) वेंकटरमणराघवनेन

(D) श्रीजीवन्यायतीर्थेन

76. 'मात्तौ गौ चेच्छालिनी वेदलोकै:'– इत्यत्र चतु:सप्तसंख्याकाक्षरबोध: कया वृत्त्या जायते?

(A) अभिधया

(B) लक्षणया

(C) व्यञ्जनया

(D) तात्पर्यवृत्त्या

77. व्यङ्ग्यार्थस्य व्यञ्जको भवति

(A) केवलं व्यञ्जकशब्द:

(B) केवलं व्यञ्जकशब्दस्तथा व्यङ्ग्यार्थ:

(C) व्यञ्जकशब्दस्तथा सर्वविध: अर्थ:

(D) केवलं व्यञ्जकशब्दस्तथा व्यङ्ग्यार्थभिन्न: सर्वविध: अर्थ:

78. ''यत्रार्थ: शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ व्यङ्क्त:''– अत्र तमर्थमिति अर्थशब्देन कस्यार्थस्य परामर्श:?

(A) लक्ष्यार्थस्य

(B) वाच्यार्थस्य

(C) प्रतीयमानार्थस्य

(D) तात्पर्यार्थस्य

79. ''अव्यङ्ग्यं त्ववरं स्मृतम्'' इत्यत्र अव्यङ्ग्यं नाम

(A) यत्र व्यङ्ग्य: नास्ति

(B) यत् न व्यङ्ग्यम्

(C) यत् न व्यङ्ग्यम् नापि च यत्र व्यङ्ग्योऽस्ति

(D) यत्र व्यङ्ग्य: अस्ति किन्तु स न स्फुट:

80. 'वज्रादपि कठोराणि मृदूनि कुसुमादपि'– इति उपलभ्यते

(A) मालतीमाधवे

(B) चारुदत्ते

(C) उत्तररामचरिते

(D) शाकुन्तले

81. वाल्मीकि-रामायणस्य बालकाण्डानुसारं रामायणे कति श्लोका:?

(A) पञ्चविंशतिसहस्रम्

(B) चतुर्विंशतिसहस्रम्

(C) त्रिंशत्सहस्रम्

(D) शतसहस्रम्

82. रामवृत्तान्तं वाल्मीकये क: प्रथमं समासत: कथयामास?

(A) ब्रह्मा

(B) नारद:

(C) भरद्वाज:

(D) अत्रि:

83. शोक: श्लोकत्वमागत: इतिवचनं सम्बद्धम् अस्ति

(A) रामायणेन

(B) महाभारतेन

(C) श्लोकवार्तिकेन

(D) श्रीमद्भागवतेन

84. प्रतिमानाटकस्य उपजीव्यमस्ति

(A) मेघदूतम्

(B) रामायणम्

(C) महाभारतम्

(D) शिशुपालवधम्

85. पाण्डवानाम् अज्ञातवास: महाभारतस्य कस्मिन् पर्वणि वर्त्तते?

(A) वनपर्वणि

(B) विराटपर्वणि

(C) शान्तिपर्वणि

(D) भीष्मपर्वणि

86. आर्षकाव्यम् नास्ति

(A) श्रीमद्भगवद्गीता

(B) महाभारतम्

(C) रामायणम्

(D) बृहदारण्यकम्

87. शाकुन्तलोपाख्यानं महाभारतस्य कस्मिन् पर्वणि उपलभ्यते?

(A) आदिपर्वणि

(B) भीष्मपर्वणि

(C) सभापर्वणि

(D) शान्तिपर्वणि

88. इदमुपपुराणं न

(A) विष्णुधर्मोत्तरपुराणम्

(B) शाम्बपुराणम्

(C) बृहन्नारदीयपुराणम्

(D) बृहद्धर्मपुराणम्

89. पुराणेषु सामान्यतो भारतवर्षस्य कति भेदा उक्ता:?

(A) पञ्च

(B) नव

(C) दश

(D) षट्

90. ह्विण्टरनित्स्-महोदयानां मतेन इदानीमुपलब्धस्य वैयासिक-महाभारतस्य रचनाकाल:

(A) ख्री. पू. चतुर्थशतकं ख्री. चतुर्थशतकं चान्तरा

(B) ख्री. पू. दशमशतके

(C) ख्री. प्रथमशतके

(D) ख्री. पू. पञ्चमशतकं ख्री. पू. प्रथमशतकं चान्तरा

91. हनुमता लङ्कापुरस्य दहनं रामायणस्य कस्मिन् काण्डे वर्तते?

(A) युद्धकाण्डे

(B) सुन्दरकाण्डे

(C) किष्किन्ध्याकाण्डे

(D) अरण्यकाण्डे

92. ''पश्यतोऽब्रुवतो भूमेर्हानिर्विंशतिवार्षिकी।
परेण भुज्यमानाया धनस्य– वार्षिकी।।''

(A) पञ्च

(B) दश

(C) अष्ट

(D) सप्त

93. ''सर्वेण तु प्रयत्नेन ___________ समाश्रयेत्''–

(A) महीदुर्गं

(B) धन्वदुर्गं

(C) वार्क्षदुर्गं

(D) गिरिदुर्गं

94. मनुसंहितानुसारं क्षत्रबन्धुं किं पृच्छेत्?

(A) कुशलम्

(B) अनामयम्

(C) क्षेमम्

(D) आरोग्यम्

95. अयं कृत्यानां भीतवर्गे नान्तर्भवति

(A) दण्डेनोपनत:

(B) विप्रकृत:

(C) प्रवासोपतप्त:

(D) सहसोपचितार्थ:

96. कौटिल्यमतेन कीदृशो दण्डो भूतानामुद्वेजनीय:?

(A) मृदु:

(B) अप्रणीत:

(C) तीक्ष्ण:

(D) दुष्प्रणीत:

97. चार्ल्स् विल्किन्स् इति विदुषा आदौ अस्याभिलेखस्य पाठोद्धार: कृत:

(A) देवपालदेवस्य मुङ्गेरशासनस्य

(B) समुद्रगुप्तस्य प्रयागस्तम्भाभिलेखस्य

(C) हर्षवर्धनस्य बाँशखेराशासनस्य

(D) खारवेलस्य हाथीगुम्फाप्रशस्ते:

98. हाथीगुम्फाप्रशस्त्यनुसारं खारवेल: कस्मिन् राजवंशे जात:?

(A) नन्दवंशे

(B) मौर्यवंशे

(C) शुङ्गवंशे

(D) चेदिवंशे

99. मौर्यब्राह्मीवर्णमालायां कति स्वरवर्णा:?

(A) पञ्च

(B) षट्

(C) दश

(D) द्वादश

100. प्रथम–रुद्रदामा कस्य पौत्र आसीत्?

(A) स्वामिचष्टनस्य

(B) स्वामिजयदाम्न:

(C) यसमतिकस्य

(D) प्रथमकनिष्कस्य

ROUGH WORK

ROUGH WORK

ROUGH WORK

ROUGH WORK